ष्यति वै इति । प्रसिद्धं हि लोके कारणमभ्युद्यतं दृष्टवतः कार्यं भविष्यतीति विज्ञानम् ॥ तेज एव तत्पूर्व्वमात्मानमुद्भूतं दर्शयित्वाऽथानन्तरमपः सृजतेऽतोऽप्सृष्ट्वाद्भूयोऽब्भ्रस्तेजः । किञ्चान्यत्तदेतत्तेज एव स्तनयित्नुरूपेण वर्षहेतुर्भवति । कथं ऊर्द्ध्वाभिश्चोर्द्ध्वगाभिर्विद्युद्भिस्तिरश्चीभिश्च तिर्य्यग्गताभिश्च महाह्लादाः स्तनयनशब्दाश्चरन्ति । तस्मात्तद्दर्शनादाद्धलौकिका विद्योतते स्तनयति वर्षिष्यति वा इत्याद्युक्तार्थमतस्तेज उपास्वेति भा० ।

नैयायिकादयस्तु परमाणुविशेषेभ्य एव तस्योत्पत्तिः । तच्च द्विविधं नित्यमनित्यञ्च नित्यं परमाणुरूपमनित्यं द्व्यणुकादि । प्रकारान्तरेण अनित्यमपि त्रिविधं देहेन्द्रियविषयभेदात् । देहः अयोनिजः वरुणचन्द्रलोकयोः श्रुत्यादिप्रसिद्धः इन्द्रियं रसनं शब्दादिषु मध्ये रसमात्रव्यञ्जकत्वात् तस्य जलीयत्वम् । द्व्यणुकादिकमारभ्य हिमकरकसिन्धुपर्य्यन्तं विषयः उपभोग्यत्वात् । स्पर्शसंख्यापरिमितिसंयोगविभागपरत्वापरत्वानीत्यष्टौ वेगः गुरुत्वं रूपं रसःस्नेहश्च जलस्यैते चतुर्द्दशसामान्यविशेषगुणाः यथोक्तं "स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम् । रूपं रसस्तथा स्नेहो वारिण्येते चतुर्द्दश । वर्णःशुक्लोरसस्पर्शौ । जले मधुरशीतलौ । स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्" । नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् इन्द्रियं रसनं सिन्धुहिमादिविषयो मतः" भाषा० । एवं स्थूलभूतजलस्य उपाधिभेदेन सुश्रुते गुणदोषादिविवेकाय भेदा दर्शिता यथा "पानीयमान्तरीक्षमनिर्देश्यरसममृतं जीवनं तर्पणं धारणमाश्वासजननं श्रमघ्नं क्लमपिपासामदमूर्च्छातन्द्रानिद्रादाहप्रशमनमेकान्ततः पथ्यतमञ्च तदेवावनौ पतितमन्यतमं रसमुपलभते स्थानविशेषान्नदीनदसरस्तड़ागवापीकूपचुण्टीप्रस्रवणोद्भिद्विकिरकेदारपल्वलादिषु स्थानेष्ववस्थितमिति । तत्र लोहितकपिलपाण्डुपीतनीलशुक्लेष्ववनिप्रदेशेषु मधुराम्ललवणकटुतिक्तकषायाणि यथासङ्ख्यमुदकानि सम्भवन्तीत्येके भाषन्ते तत्तु न सम्यक् तत्र पृथिव्यादीनामन्योन्यानुप्रवेशकृतः सलिलरसो भवत्युत्कर्षापकर्षेण तत्र स्वगुणभूयिष्ठायां भूमावम्लं लवणञ्च । अम्बुगुणभूयिष्ठायां मधुरम् । तेजोगुणभूयिष्ठायां कटुकं तिक्तञ्च । वायुगुणभूयिष्ठायां कषायञ्च । आकाशगुणभूयिष्ठायामव्यक्तरसमव्यक्तं ह्याकाशमित्यतस्तत्प्रधानमव्यक्तरसत्वात् तत्पेयमान्तरीक्षालाभे । तत्रान्तरीक्षं चतुर्व्विधम् । तद्यथा । धारं कारं तौषारं हैममिति । तेषां धारं प्रधानं लघुत्वात्तत्पुनर्द्विविधं गाङ्गं सामुद्रं चेति । तत्र गाङ्गमाश्वयुजे मासि प्रायशो वर्षति तयोर्द्वयोरपि परीक्षणं कुर्व्वीत शाल्योदनपिण्डमकुथितमविदग्धं रजतभाजनोपहितं वर्षति देवे वहिष्कुर्व्वीत स यदि मुहूर्त्तं स्थितस्तादृश एव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्णान्यत्वे सिक्थक्लेदे च सामुद्रमिति विद्यान्नतु तदुपादेयम् । सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गं पुनः प्रधानं तदुपाददीताश्वयुजे मासि, शुचिशुक्लविततपटैकदेशच्युतमथ वा हर्म्यतलपरिभ्रष्ट मन्यैर्व्वा शुचिभिर्भाजनैर्गृहीतं सौवर्णे राजते मृण्मये वा पात्रे निदध्यात्तत्सर्व्वकालमुपयुञ्जीत तस्यालाभे भौमम् । तच्चाकाशगुणबहुलं तत्पुनः सप्तविधम् । तद्यथा । कौपं नादेयं सारसं ताड़ागं प्रास्रवणमौद्भिदं चौण्टमिति तत्र वर्षास्वान्तरीक्षमौद्भिदं वा सेवेत महागुणत्वात् शरदि सर्व्वं प्रसन्नत्वात् हेमन्ते सारसं ताड़ागं वा, वसन्ते कौपं प्रास्रवणं वा ग्रीष्मेप्येवं प्रावृषि चौण्टमनवमनभिवृष्टं सर्व्वञ्चेति ॥ कीटमूत्रपुरीषाण्डशवकोथप्रदूषितम् । तृणपर्णोत्करयुतं कलुषं विषसंयुतम् ॥ योऽवगाहेत वर्षासु पिबेद्वापि नवं जलम् । स वाह्याभ्यन्तरान् रोगान् प्राप्नुयात्क्षिप्रमेव तु ॥ तत्र यत् शैवालपङ्कहटतृणपद्मपत्रप्रभृतिभिरवच्छन्नं शशिसूर्य्यकिरणानिलैर्नाभिजुष्टं गन्धवर्णरसोपसृष्टञ्च तद्व्यापन्नमिति विद्यात् ॥ तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकदोषाः षट् सम्भवन्ति । तत्र खरता पैच्छिल्यमौष्ण्यं दन्तग्राहिता च स्पर्शदोषाः । पङ्कसिकताशैवालबहुवर्णता रूपदोषाः । व्यक्तरसता रसदोषः । अनिष्टगन्धता गन्धदोषः । यदुपयुक्तं तृष्णागौरवशूलकफप्रसेकानापादयति स वीर्य्यदोषः । यदुपयुक्तं चिराद्विपच्यते विष्टभ्नाति वा स विपाकदोष इति । त एते आन्तरीक्षे न सन्ति ॥ व्यापन्नानामग्निक्वथनं सूर्य्यातपप्रतापनं तप्तायःपिण्डसिकतालोष्ट्राणां वा निर्व्वापणं प्रसादनञ्च कर्त्तव्यं नागचम्पकोत्पलपाटलापुष्पप्रभृतिभिश्चाधिवासनमिति ॥ सौवर्णे राजते ताम्रे कांस्ये मणिमये तथा । पुष्पावतंसं भौमे वा सुगन्धि सलिलं पिबेत् ॥ व्यापन्नं वर्जयेन्नित्यं तोयं यच्चाप्यनार्त्तवम् । दोषसञ्जननं ह्येतन्नाददीताहितन्तु तत् ॥ व्यापन्नं सलिलं यस्तु पिबतीह्यप्रसादितम् । श्वयथुं पाण्डुरोगञ्च त्वग्दोषमविपाकताम् ॥ श्वासकासप्रतिश्यायशूलगुल्मोदराणि च । अन्यान्वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव च ॥ तत्र सप्त कलुषस्य प्रसादनानि भवन्ति । तद्यथा । कतकगोमेदकविसग्रन्थिशैवालमूलवस्त्राणि मुक्तामणिश्चेति ।